**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 6
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# श्रीप्रमुखस्वामिचरितम् इति काव्ये प्रमुखस्वामिमहाराजः

झुमापालः
शोधच्छात्री, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आन्ध्रप्रदेशः)

**Article Info**

Accepted : 05 Nov 2024
Published : 25 Nov 2024

**Publication Issue :**
November-December -2024
Volume 7, Issue 6

**Page Number :** 01-06

**सारांशः**–भारतभूमिर्खलु नैकेषां सतां महात्मनां पुण्यमयी जन्मभूमिः । वैदिकसनातनधर्म-सुनिष्ठितानां परमात्मपरमभक्तिमतां ब्रह्मविद्याविभूषितानाम् अनेकेषां पवित्राऽऽत्मनां पुण्याऽवतरणेन नूनम् अस्माकं वैदिकसनातनसंस्कृतेः परिरक्षणं परिपोषणं परिवर्धनं च सञ्जातमिति सर्वसाक्षिकम्। तस्यामेव सतां महापुरुषाणां परम्परायां परमपूज्या ब्रह्मस्वरूपाः श्रीप्रमुखस्वामिमहाराजा लोकेऽस्मिन् अवतीर्णा इत्यस्माकं परमं भाग्यम्। अतः श्रीप्रमुखस्वामिचरितम् इति काव्ये प्रमुखस्वामिमहाराजः इति शीर्षकमाश्रित्य शोधलेखः लिखितः।

**कूटशब्दाः**– प्रमुखस्वामिमहाराजः, श्रीरामचन्द्रः, बी. ए. पी. एस., संसारः, मोक्षः, मर्यादा इत्यादयः।

'बुद्ध-तीर्थङ्कर-राम-कृष्ण-कबीर-नानकादिभिः सदवतारैः भारतदेशः संवर्धितः। अधुना कस्यचित् पुरुषस्य प्रतीक्षा प्रचलति येन भारतीयसंस्कृतेः दिशादर्शनं भवेत् कौटुम्बिकाध्यात्मिकसामाजिकराजकीयस्तरे च पुष्टिर्भवेत्। भगवत्कृपया एतादृशः पुरुषः प्राप्तः। तस्य नामधेयं प्रमुखस्वामिमहाराजोऽस्ति।यथा प्राह –

**संपूज्यते यत्र जगत्छरण्यः**
**श्रीवासुदेवो भगवान् मुकुन्दः।**
**तत्रार्च्छते नः प्रमुखो वरेण्यो**
**दीनार्तहारी करुणावतारः॥**[1]

यदि भारतस्य एकीकरणम् इच्छितं तर्हि प्रमुखस्वामिनो नेतृत्वेन तच्छक्यं भविष्यति। प्रमुखस्वामी स्वामिनारायणसम्प्रदायस्य प्रमुखो नास्ति, स तु हिन्दुधर्मस्य प्रमुखः। न तु केवल-हिन्दुधर्मस्य परन्तु भारतीयसमाजस्य प्रमुखोऽस्ति।

प्रमुखस्वामिमहाराजस्तु पवित्रताशान्तिप्रेमगुरुकृपाणां मूर्तिमत्स्वरूपम् अस्ति। तस्य परितः साधुतासुहृदयतावैश्विकप्रेमाणि इत्येतेषां दुर्लभा आभा वर्तते या तस्य सन्निधौ अनुभूयते। भगवान् श्रीरामचन्द्रो मर्यादापुरुषोत्तमः इति संज्ञया प्रसिद्धः, तदैव सम्प्रति प्रमुखस्वामिमहाराजो मर्यादापुरुषो वर्तते। तस्मिन् एकस्य आदर्शसाधोर्दर्शनं भवति। यथा काव्ये आस्मिन्

[1].श्रीप्रमुखस्वामिचरितम् 19

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

**प्रसन्नभानुशोभनं प्रफुल्लपद्मलोचनम्।**
**करोमि यस्य वन्दनं स पातु मां प्रतिक्षणम्॥**
**अनन्तशक्तिभास्करो विलोक्य यस्य साहसम्।**
**न भासते, न भाषते, न वात्र भाति भास्करः॥**[2]

प्रमुखस्वामिमहाराजविषयकेषु नैकावतरणेषु तस्य परिचयः प्राप्तः। अधुना अगाधमहासागर इव विस्तीर्णस्य तस्य जीवनस्य कार्यस्य च प्रारम्भः 7/12/1921इति दिनाङ्के, विक्रमाब्दे 1978 इति वर्षे मार्गशीर्षमासे शुक्लाष्टम्यां बुधवासरेऽभवत्। अयं एव तस्य जन्मदिनः।वटपत्तनजनपदस्य पादरातालुके चाणसदग्रामे तस्य प्रादुर्भावः। मोतीभाईमहोदयः तस्य पिता आसीत्। श्रीमतीदीवालीबा इति तस्य माता आसीत्। तस्य बाल्यकालस्य नाम शान्तिलालः आसीत्। शान्तिलालः इति नाम च यथार्थतया तस्य व्यक्तित्वे प्रतिबिम्बतया विराजते स्म। बाल्यकालाद् एव तस्य हिमालयं गत्वा ध्यानं कर्तुमिच्छा मनसि आसीत्। किशोरावस्थायां सः भगवानश्रीस्वामीनारायणस्य आध्यात्मिकपरम्परायाः तृतीयगुरुदेवस्य ब्रह्मस्वरूपशास्त्रीजीमहाराजस्य पवित्रव्यक्तित्वे आकृष्टः आसीत्। स पोषशुक्लप्रतिपदायां बुधवासरे विक्रमाब्दे 1996 इति वर्षे 10/1/1940इति दिनाङ्के वयसः अष्टादशे वर्षे प्राथमिकमध्ययनं समाप्य गुरोः यज्ञपुरुषदासब्रह्मस्वरूपशास्त्रिमहाराजतः त्यागाश्रमदीक्षां गृहीतवान्नासीत्। दीक्षानन्तरं तस्य नामाभिधानं साधुर्नारायणस्वरूपदासः इति जातमासीत्। यथा श्रीप्रमुखस्वामिपद्यपुष्पाञ्जल्यामुक्तम्–

**प्रथमं शान्तिलालेति नाम्न जन्माभवत् ततः।**
**द्विजत्वं दीक्षया प्राप्तं प्रमुखस्वामिभिस्तथा॥**[3]

परन्तु विक्रमाब्दे 2006 इति वर्षे ज्येष्ठशुक्लचतुर्थ्यां रविवासरे 21/5/1950 इति दिनाङ्के श्रीनगरे तस्य बी. ए. पी. एस. संस्थायाः प्रमुखपदे नियुक्तिः कृता गुरूयज्ञपुरुषदासैः। यतस्ते प्रमुखपदे नियुक्तः अतः एव प्रमुखस्वामिमहाराज इति नाम्ना प्रसिद्धोऽभवत्। अस्मिन् महानिबन्धे तं प्रमुखस्वामिमहाराजं 'स्वामिवर्यः' इत्यपि नामधेयेन उल्लिख्यते। यथा श्रीप्रमुखस्वामिपद्यपुष्पाञ्जल्यामुक्तम् –

**मार्गशीर्षे शुभे शुक्ले ह्याष्टम्यां प्रमुखो भुवम्।**
**समागमत् यथा व्यासो हरिसेवनकाङ्क्षया।**
**मासानां मार्गशीर्षेऽस्मिन्नुत्तमे भगवत्प्रिये।**
**अष्टम्यां च तिथौ देव्याः प्रियायां भक्तजन्मना॥**

अनन्तशक्तिभास्करं परमं विष्णुं द्रष्टुं सामान्यानामस्माकं नास्ति साहसम्। सांख्यप्रतिपादितैः त्रिविधैः दुःखैः यदा मनः जर्जरितं भवति तदा तद्भजेन तपोज्ज्वलमनुभूयते। यदैव जनाः प्रभूपादे लीना भवन्ति तदा कामाना, यातना, कामवासना, वित्तभीतिभावना वा न किमपि जागर्ति मनसि इति कविः। प्रभुसमीपे गत्त्वा भजनं क्रियते चेद् मनः शान्तियुक्तं भवति। यद्यपि बहवः देवताः पूज्यन्ते। परन्तु सर्वेषामन्तिमा गतिर्भवति परमात्मपदमेव। यथा नदीनां बहवोः अम्बुवेगाः भवन्ति। ते च सर्वे समुद्रमेवाभिमुखा भवन्ति। तथा धरायां सकलाः सुमार्गाः जगच्छरण्यं श्रीवासुदेवभगवन्तं मुकुन्दं प्रति गच्छति। तदेव प्राह गीतायां स्वयं भगवान् कृष्णः –

---

2.श्रीप्रमुखस्वामिचरितम् 12–13

3.श्रीप्रमुखस्वामिचरितम्श्लो.–

**ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।।**

अत्र कवि: प्रमुखस्वामिनं महाराजं विष्णोरवतारत्वेन उपमितवान्। यथा प्रबुद्धा: सुजना: जना: जनताहिताय कार्यं कुर्वन्ति तद्वद् दीनार्तहारी स प्रमुखस्वामी महाराज: नवीनरीत्या पुन: विशालमिदं संसारं संस्थापितवान्। अस्य अवतारत्वं प्रतिष्ठाय प्राह कवि: –

**स एव बिन्दु: स महासमुद्र:**

**स एव शम्भु पुरुषत्तमोऽस्ति।**

**अनक्षरश्चाक्षररूपराशि: स्वयं स्वयंभुर्भगवाननन्त:।**

**अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्।**

**विश्ववृक्षमूलाधारं प्रमुखस्वामिनं भजे।।**

**स एव परमाराध्यो मुकुन्दो माधवो हरि:।**[4]

स भारते भारतभाग्यधाता इव विराजमान:। स स्वामिनारायणरूपधारी दीनबन्धुर्मधुरो महात्मा। स गङ्गामिव सर्वान् मोक्षं प्रदातुं विश्वेऽस्मिन् आविर्भूत:। अत: मत्सदृशै: सामान्यजनै: तद्वर्णनं न हि विधातुं शक्यते इति कवि:।[5]

शक्तौ भक्तौ व्यक्तित्त्वे च समान: स:। तथा तेषां वाण्यां विद्यमान: वैभव: श्रोतु: वक्तुश्च अत्यन्तं प्रिय:प्रमुखश्चासीदिति हेतो: प्रमुखस्वामी इति नामकरणमिति केषाञ्चिन्मतम्। अपि च तद्वैशिष्ट्यत्वेन कैश्चिदुच्यते –

**फलवानिक्षुदण्डोऽयं सपुष्पश्चन्दनस्तथा।**

**सुष्ठुगन्ध:सुर्वणोऽयं प्रमुख: स्वामिनां वर:।।**[6]

स महाराजस्तु पवित्रशान्तिप्रेमगुरुकृपाणां मूर्तिस्वरूपमस्ति। तत्सन्निधौ तु साधुतासुहृदयतावैश्विकप्रेम्न: दुर्लभा आभा अनुभूयते। यथा भगवान् श्रीरामचन्द्र: द्वापरयुगे मर्यदापुरुषोत्तम: इत्युक्तिना प्रसिद्ध: तथैव कालेऽस्मिन् पालक: हारक: संरक्षक: सनातन: शङ्कररूप: विष्णुरूप: परं ब्रह्म: प्रमुखस्वामिमहाराज: मर्यादापुरुष:। यथा काव्ये–

**स एव बिन्दु:, स महासमुद्र:**

**स एव शम्भु, पुरुषोत्तमोऽस्ति।**

**अनक्षरश्चाक्षररूपराशि:**

**स्वयं स्वयंभुर्भगवाननन्त:।।**[7]

स: जन्मजातविनयेन, सत्यसेवया:, तपस्यया:, जनहितकार्ये नि:स्वार्थभावेन सर्वेषां प्रियपात्र: आसीत्। 1950 तमे वर्षे केवलं अष्टोत्तरविंशतकालिके वयसि बी.ए.पी.एस्. इति संस्थाया: निर्माणं कारितवान्। अस्य विषये प्राह –

---

4.श्रीप्रमुखस्वामिचरितम् – 4-5

5.स स्वामिनारायणरूपधारी स दीनबन्धुर्मधुरो महात्मा।
स भारते भारतभाग्यधाता संस्कारगङ्गावहने समर्थ:।।
न मेऽस्ति वित्तं न च बुद्धिविद्ये न भावभाषाभरणाग्रदृष्टि:।
न वास्ति वैदुष्यविदग्धता मेकथं करोमि प्रमुखं प्रसन्नम्।।श्रीप्रमुखस्वामिचरितम् 24-25।।

6.श्रीप्रमुखपद्यपुष्पाञ्जलि:[१४]

7.श्रीप्रमुखस्वामिचरितम् 22

**प्रमुखवटवृक्षस्यछाया यत्र सुशीतला।**
**तत्र भयनिदाघस्य तापस्तप्येत् कथं नरान्॥**
**स्वामिनो यत्र योद्धार:प्रमुखस्वामिप्रेरिता:।**
**वि. ए. पि. एस् च संस्थयाप्रसारयन्ति संस्कृतिम्॥**
**प्रमुखप्रेरणाधारायत्र मन्दाकिनीयते।**
**काम्यं तत्र न वैकुण्ठंन वा त्रिदिववैभवम्॥**[8]

विक्रमाब्दे 2006 इति वर्षेज्येष्ठशुक्लचतुर्थ्यां रविवासरे 21/5/1950 इति दिनाङ्के श्रीनगरे तस्य बी. ए. पी. एस. संस्थाया: प्रमुखपदे नियुक्ति: कृता गुरूयज्ञपुरुषदासै:। यतस्ते प्रमुखपदे नियुक्त: अत: एव प्रमुखस्वामिमहाराज इति नाम्ना प्रसिद्धोऽभवत्। अस्मिन् महानिबन्धे तं प्रमुखस्वामिमहाराजं 'स्वामिवर्य:' इत्यपि नामधेयेन उल्लिख्यते। स्वामीनारायणसंस्थाया: अध्यक्षत्वे प्राप्ते प्रमुखस्वामीमहाराजस्य लोकप्रियता चरमशिखरं प्राप्ता।दिव्यजीवनसङ्घस्य तत्कालिकाध्यक्ष: स्वामिचिदानन्दवर्या: प्राहु:- ParamPujyaPramukh Swami Maharaj is an embodiment of Holiness, of 'Shanti', 'Prem' and 'Gurukripa'... He has a rare aura of saintliness, friendliness and universal love ('Vishwa-Prem') that is tangibly felt when you come into his presence and proximity. All have heard Bhgawan Shri Ramchandra referred to as a 'MaryadaPurushottam.' In revered Pramukh Swami Maharaj, we have a 'Maryada-Purush' of our times. We see him as an ideal sadhu."(**प्रमुखस्वामिमहाराजस्तु पवित्रताशान्तिप्रेमगुरुकृपाणां मूर्तिमत्स्वरूप-मस्ति। तत्परित: साधुतासुहृदयतावैश्विकप्रेमाणि इत्येतेषां दुर्लभा आभा वर्तते या तस्य सन्निधौ अनुभूयते। भगवान् श्रीरामचन्द्रो मर्यादापुरुषोत्तम: इति संज्ञया प्रसिद्ध:, तदैव सम्प्रति प्रमुखस्वामिमहाराजो मर्यादापुरुषो वर्तते। तस्मिन् एकस्य आदर्शसाधोर्दर्शनं भवति**।)

1971 तमे वर्षे ब्रह्मस्वरूपयोगीजीमहाराज: अस्या: संस्थाया: उत्तराधिकारीत्वेन चयनित:। गुरुपदं स्वीकृत्य स असंख्यजनानां जीवने आध्यात्मिकप्रेरणाम् अयच्छत्।

- **सामाजिकसेवासरितो वाहक** :

**विहाय चञ्चलत्वं चबाला: सुकोमला: किल।**
**प्रमुखस्वामिवर्याणांप्रभावेण प्रभाविता:॥**
**भवन्त: कृतसङ्कल्पा:सेवाकार्याणि नित्यश:।**
**कुर्वन्ति सानुरागंभक्तिभावरसाप्लुता:॥**[9]

**'अस्माकं स्वकल्याणं परहिते एव वर्तते**... इति तस्य जीवनस्यासीत् मूलमन्त्र:। अनेन जीवनसूत्रेण स: सम्पूर्णं जीवनं विविधसामाजिकसेवासु समर्प्य असंख्यजनानाम् त्राता अभवत्। लोकसेवायै आजीवनं यात्रीं भूत्वा स: निरन्तरं 17.000

---

[8].श्रीप्रमुखस्वामिचरितम् -81-83

[9].श्रीप्रमुखस्वामिचरितम्  -265- 266

संख्याकाधिकानि ग्रामाणि नगराणि च भ्रमति स्म। अक्षरधाम् इत्यादीनां विश्वप्रसिद्धानां संस्कृतिकेन्द्रातिरिक्तं स: 1100 इति संख्याकानि मन्दिराणि स्थापयित्वा विश्वे सांस्कृतिकस्मारकानिलोकसेवाकेन्द्राणि च अस्थापयत्।

प्रमुखस्वामिमहाराजकृतं समाजसेवाकार्यं व्यापकमस्ति परन्तु गहनमपि अस्ति इति निर्दिश्य श्रीबिपीनभाईमहोदय (अधिकसमाहर्ता श्री च रजिस्ट्रार इति पदवाच्य:, चिल्ड्रन युनिवर्सीटी, गान्धीनगरम्) उक्तवान् 'कच्छभूकम्पानन्तरं नगरायोजनयोजनायां 700 तोऽधिकदलितनिम्नज्ञातिपरिवारा राज्यभूमौ वसन्ति स्म। अस्माकं कृते तेषां पुनर्वसनस्य महती समस्याऽसीत्। तेषु प्राय: परप्रान्तियदलिता बङ्ग-आसाम- - उत्तरप्रदेश-बिहार-हरियाणाराजस्थान-मध्यप्रदेश- महाराष्ट्र- तामिलनाडु कर्णाटक - आन्ध्रप्रदेश- केरालादिराज्यवासिन आसन्। ते सर्वे सेनायां सामान्यभृत्यं भूत्वा निवृत्तेरनन्तरम् अत्रैव पतिता:। तेषु व्यसनानां प्रमाणमप्यत्यधिकम् आसीत्। एतादृशान् जनान् क: साहाय्यं कुर्याद् ? ये केनाऽपि सह परिचिता न स्यु: वार्तालापं च कर्तुमपि न शक्तवन्त:। तादृश्यां परिस्थित्यां प्रमुखस्वामिमहाराजप्रेरणया बी. ए. पी. एस. संस्था तद्दलितानां पाणिग्रहणं कृतवती। तेषाञ्च आवासनिर्माणस्योत्तरदायित्वं स्वीकृतवती। तेषां जनानाम् एकं ग्रामं वासयित्वा स्वामिवर्य: तेषां पुनर्वसनं कारितवान्।

इमान् जनान् आर्थिकरीत्या स्वनिर्भरान् कर्तुं नानाप्रकारकसाहाय्यं कृतम्। भीरण्डियारा - होडको मीसरियाडो - प्रागपर-2 - नानीभूजपर - सीराचादिषु स्थलेषु निम्नजनेभ्यो हस्तपटनिर्माणसाधनानां व्यवस्था कृता। चर्मसीवनाय यन्त्राणि प्रदत्तानि। गृहकारेभ्य: सामग्र्य: प्रदत्ता:। अन्नपेषणाय पेषणी, वेषवारपेषणाय पेषणी, मण्डपानि, काष्ठयन्त्राणि साधनसम्पुटिका च, खरयानं, पर्पटादिनिर्माणसाधनानि इत्यादि दत्वा नैकप्रकारेण व्यावसायिकसद्धरणसाहाय्यं कृतवती संस्था। प्रायो लाभार्थिनो हरिजनवास कोलीज्ञातिवासानाम् अन्यनिम्नज्ञातिनां च जना आसन्।

आवासपाठशालानिर्माणार्थं संवर्गसुविधार्थं च निम्नगृहाश्च महिला गृहचालनाय स्वनिर्भरा भवेयु: तदर्थं संस्था बहूनि सुन्दराणि आयोजनानि कृतवती। तदर्थं संस्था 154 घटोध्निपशून् प्रदत्तवती। तेषां दुग्धाद् एककालस्य दुग्धं गृहे उपयोगाय एककालस्य च विक्रयणाय कृत्वा नार्य: प्रतिदिनं 50 रूप्यकाणि लभेयु: तत्प्रकारकव्यवस्था कृता। अन्यच्च वर्षत्रयपर्यन्तं तत्पशो: सम्भाव्यहानिपूरकशुल्कस्य (Insurance)योजना कृता। तथा च पशुचिकित्सकानामपि व्यवस्था कृता। महिषीणां कृते पेयजलार्थं तडागव्यवस्था तथा च दुग्धतृणचारनयनापनयनयानसहितसर्वव्यवस्था संस्थया कृता। 6.5 एकर (Acer) भूमौ रजकाया: (सस्यविशेषस्य) वपनं, फलदारवृक्षानाम् आरोपणम् इत्यादीनि नानाऽऽयोजनानि कृतानि। ता महिला: स्वनिर्भरा भवेयु: तदर्थं ताभ्यो नानालघूद्योगप्रशिक्षणं प्रदत्तम्। सम्पूर्णाऽज्ञाताऽबुधानां तद्वनितानाम् उद्योगाऽऽरम्भाऽऽवश्यकसाधनसामग्र्यर्थम् उपादानार्थं निर्मितवस्तुविक्रयार्थं समन्तिकपण्यसंयोजनार्थं च भूरिपरिश्रमो जात:।

अन्यच्च बीजानि दत्त्वा प्रतिगृहमेव हरितकप्ररोहरणार्थं संस्था लघुमहानसोद्यानानि निर्मितवती। रामकोशातकी-रक्ताङ्ग- कर्कटी-अलाबु-इत्यादिशाकान् प्ररोहयित्वा भोजने तेषां महत्त्वं विज्ञापयित्वा च जनान् नित्यभोजने तेषाम् उपयोगं कुर्वत: कृतवती। अरण्यान्ते वसन्तो निम्नग्रामेष्वपि जना हरितशाकान् भोक्तुं प्रारभन्। प्रागपर-2 रामनगर भीरण्डियारा - होडको - जामकुनरियाऽऽदिषु ग्रामेषु 412 स्थानेषु इज्ञरायेलदेशागतबिन्दुसिञ्चनपद्धत्या महानसोद्यानानि निर्मितानि। तत्रैव उत्पादितानां सरसहरितशाकानां नित्यं सेवनेन तत्परिवारबालकै: सह सर्वेषां स्वास्थ्यानि सुष्ठु अभवन्। तेन पशव इव जीवन्त: ते मनुष्या इव जीवन्तोऽभवन्। तद्दलितानां जीवनस्तरोत्कर्षे प्रमुखस्वामिमहाराजस्य बी.ए.पी.एस. संस्थायाश्च अनन्ययोगदानमहं स्वयमेव दृष्टवान्। -

**तस्यातिदीनदु:खार्तदु:खदलविमोचन:।**
**श्री स्वामी प्रमुखोऽव्यक्तआर्तत्राणपरायण:॥**
**वि.ए.पि. स्च संस्थायास्वामिन: कार्यकारिण:।**

**निर्दिशत् सेवितुं तप्तान्भूकम्पनप्रपीडितान्॥**

**स्वामिन: सेवका भक्ताविभक्ता भावुका: वरा:।**

**प्रमुखस्वामिपादानांनिर्देशेन समादरै:॥**

**कृतवन्त: सुकार्याणिते सर्वे जनसेवका:।**

**नाविका शक्तिसंपन्नामहादु:खमहोदधे:॥**[10]

अनेन प्रकारेण मया साररूपेण प्रमुखस्वामिनं वर्णितम्।

## परिशीलितग्रन्थसूची


1. श्रीसत्संगिजीवनम्, शतानन्दमुनि:, कोठारीपुराणीधर्मस्वरूपदासजी
2. श्रीसत्संगिजीवनम्, शतानन्दमुनि:, कोठारीपुराणीधर्मस्वरूपदासजी, 1936
3. शिक्षापत्री, भगवानस्वामिनारायश, स्वामिनारायणअक्षरपीठ
4. 'स्वामिनारायणप्रकाश:' इतिसामयिक:, जुलाई– 2011 प्रकाश, स्वामिनारायणसंस्थाअक्षरपीठ

5.'સંસ્કૃતિનાઆધારસ્તંભ-શાસ્ત્ર, મંદિર, સાધુ'; લે. સાધુવિવેકસાગરદાસ, પ્રકા. સ્વામિનારાયણઅક્ષરપીઠ

6.189.श्रीहरिलीलाकल्पतरु:,आचार्यरघुवीरजिमहाराज:,शेठमाणेकलालचुनीलालनाणावटो, सं. 2020

7.190. श्रीसत्संगिजीवनम्शतानन्दमुनि:, कोठारीपुराणीधर्मस्वरूपदासजी,

8.Talent is never Enough, John C. Maxwell, Thomas Nelson Inc., 2007

9.The 7 Habits of Highly Effective People, Stephen Covey, Simon and Schuster, 1989

10.The 8th Habit, From Effectiveness to Greatness, Stephen R. Covey, Free Press, 2001

11.शिक्षापत्री, भगवानस्वामिनारायण, स्वामिनारायणअक्षरपीठ

12.श्रीप्रमुखस्वामीचरितम्, रवीन्द्रकुमारपण्डा

13.श्रीसत्संगिजीवनम्शतानन्दमुनि:,कोठारीपुराणीधर्मस्वरूपदासजी, 1936

14.स्वामिनारायण – प्रकाश' मासिक:, स्वामिनारायणअक्षरपीठ, मई–2010

15.श्रीप्रमुखपद्यपुष्पाञ्जलि:, सम्पा.डॉ.ललितकुमारपटेल:, श्रीसोमनाथविश्वविद्यालय:


[10].श्रीप्रमुखस्वामिचरितम् –253–256